# Navapadyasuratnamala

# નવપદ્યસુરત્નમાલા

## Document Information

Text title : Navapadyasuratnamala

File name : navapadyasuratnamAlA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : shrInidhiyati

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# નવપદ્યસુરત્નમાલા

શ્રીકાન્તતીર્થ ગુરુરાજ કરાબ્જજાત
શ્રીનિધિર્યતિરુદાર ગુણોલ્લસન્તીમ્ ।
શ્રીપાદરાજ નવપદ્ય સુરત્નમાલાં
ભક્ત્યા કરોમિ ગુરુરાજ વરપ્રસાદાત્ ॥ ૧॥

શ્રીપૂર્ણબોધકુલવાર્ધિસુધાકરાય
શ્રીવ્યાસરાજગુરવે યતિશેખરાય ।
શ્રીરઙ્ગવિઠ્ઠલપદામ્બુજ બમ્ભરાય
શ્રીપાદરાજ ગુરવેસ્તુ નમશ્યુભાય ॥ ૨॥

સમ્પૂરિતાખિલ જનોરુ મનોરથાય
શ્રીમન્નૃસિંહસરસીતટ સંસ્થિતાય ।
શ્રીમત્સુવર્ણવર્ણસમવર્ણ કરાબ્જજાય
શ્રીપાદરાજગુરવેસ્તુ નમશ્યુભાય ॥ ૩॥

શ્રીવ્યાસરાજ ફણિબન્ધ નિવારકાય
તદ્ભાષયૈવ ફણિરાજ સુતોષકાય ।
શ્રીમત્સુરત્ન ખચિતોજ્જ્વલ કુણ્ડલાય
શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૪॥

શ્રીગોપિકાપતિ નિવેદિત ષષ્ટિશાક-
મુખ્યોરુ ભોજન વિદૂષણ તત્પરાણામ્ ।
સન્દર્શિતોરુ નિજકુક્ષિગતાર્દ્રશાકાન્
શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૫॥

શ્રીમદ્યતીશ રઘુનાથ મુનેર્વિમાનાત્
પુષ્પે સ્વમૂર્દ્ધ્નિપ્રતતિ પ્રસમીક્ષ્યચોક્ત્વા ।
સંપ્રેરિતોરુ રઘુનાથ મુનીશ્વરાય
શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૬॥

શઙ્ખસ્થિતેન પયસા દ્વિજઘાતપાપે
    દૂરીકૃતે બહુજનેષુ વિ શઙ્કિતેષુ ।
તેનૈવ શુદ્ધમલિનાતિપટિચ્છરાય
    શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૭॥

શ્રીમન્નૃસિંહસરસી પયસિ પ્રમોદા-
    દ્ધ્યાયામિ તિષ્ઠ સરસી શુભકારિ તીરે ।
સ્વપ્નેનિબોધ નળિની જયદક્ષગાભૂત્
    શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૮॥

દુર્વાદિવારણ વિદારણ દીક્ષિતાય
    શ્રીમદ્રમેશચરણાબ્જગુહાશ્રયાય ।
વ્યાખ્યાનિનાદ રુચિરોરુ મૃગાધિપાય
    શ્રીપાદરાજ ગુરવેસ્તુ નમશ્શુભાય ॥ ૯॥

કસ્તૂરિકાદિ સમલઙ્કૃત દિવ્યદેહં
    દૃષ્ટ્વાવિદૂષયતિ મૂઢજને ક્ષણેન ।
તત્યાગધારિત તનૂઃ પરિરક્ષકાય
    શ્રીપાદરાજ ગુરુવેસ્તુ નમશ્શુભાય ॥ ૧૦॥

શ્રીપાદરાજ નવપદ્ય સુરત્નમાલાં
    યેધારયન્ત્યનુદિનં ભુવિશુદ્ધભાવાઃ ।
વૃન્દાવનસ્ય પુરતસ્સકલેષ્ટદશ્ચ
    શ્રીપાદરાજગુરુરાજ હૃદબ્જવાસી ॥ ૧૧॥

ઇતિ શ્રીનિધિયતિવિરચિતા નવપદ્યસુરત્નમાલા સમાપ્તા ।

Encoded and proofread by Krishnananda Achar

*Navapadyasuratnamala*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*